"अष्टौ शतसहस्राणि वर्षाणां मानुषाणि तु ।
चतुःषष्टिसहस्राणि वर्षाणां द्वापरं युगम् ॥"
८६४,००० ॥ तस्य धर्म्मो यथा,—
"अत ऊर्द्धं प्रवक्ष्यामि द्वापरस्य विधिं पुनः ।
तत्र त्रेतायुगे क्षीणे द्वापरं प्रतिपद्यते ॥
द्वापरादौ प्रजानान्तु सिद्धिस्त्रेतायुगे तु या ।
परिवृत्ते युगे तस्मिंस्ततः सा विप्रणश्यति ॥
ततः प्रवर्त्तते तासां प्रजानां द्वापरे पुनः ।
लोभो धृतिर्वणिग्युद्धं तत्त्वानामविनिश्चयः ॥
प्रध्वंसश्चैव वर्णानां कर्म्मणाञ्च विपर्य्ययः ।
यज्ञो वधः पशोर्द्दण्डो मानो दर्पः क्षमा बलम् ॥
तथा रजस्तमो भूयः प्रवृत्ते द्वापरे पुनः ।
आद्ये कृते न धर्म्मोऽस्ति स त्रेतायां प्रवर्त्तितः ॥
द्वापरे व्याकुलो भूत्वा प्रणश्यति कलौ पुनः ।
वर्णानां द्वापरे ध्वंसः संकीर्य्यन्ते तथाश्रमाः ॥
द्वैधमुत्पद्यते चैव युगे तस्मिन् श्रुतौ स्मृतौ ।
द्विधा श्रुतिः स्मृतिश्चैव निश्चयो नाधिगम्यते ॥
अनिश्चयोऽधिगमनाद्धर्म्मतत्त्वं न विद्यते ।
धर्म्मतत्त्वे ह्यविज्ञाते मतिभेदस्तु जायते ॥
परस्परविभिन्नैस्तैर्दृष्टीनां विभ्रमेण तु ।
ततो दृष्टिविभिन्नैस्तैः कृतं शास्त्राकुलं त्विदम् ॥
एकं वेदं हि वै व्यासः संहृत्य तु पुनः पुनः ।
संक्षेपादायुषश्चैव दृश्यते द्वापरे त्विह ।
वेदश्चैकश्चतुर्द्धा तु व्यस्यते द्वापरादिषु ॥
ऋषिपुत्त्रैः पुनर्भेदाद्भिद्यन्ते दृष्टिविभ्रमैः ।
मन्त्रब्राह्मणविन्यासैः स्वरक्रमविपर्य्ययैः ॥
संहिता ऋग्यजुःसाम्नां संहितास्तैः श्रुतर्षिभिः ।
सामान्याद्वैकृताच्चैव दृष्टिभिन्नैः क्वचित् क्वचित् ॥
ब्राह्मणं कल्पसूत्राणि भाष्यविद्यास्तथैव च ।
अन्ये तु प्रस्थितास्ते वै केचिन्न प्रत्यवस्थिताः ॥
द्वापरेषु प्रवर्त्तन्ते भिन्नार्थैस्तैः सुदर्शनैः ।
एवमाध्वर्य्यवं पूर्ब्बमासीद्द्वैधं ततः पुनः ॥
सामान्यविपरीतार्थैः कृतं शास्त्राकुलं त्विदम् ।
आध्वर्य्यवस्य प्रस्थानैर्बहुधा व्याकुलीकृतम् ॥
तथैवाथर्व्वणां साम्नां विकल्पैः स्वस्य संचयैः ।
व्याकुलो द्वापरेष्वर्थः क्रियते भिन्नदर्शनैः ॥
द्वापरे सन्निवृत्तास्ते वेदा नश्यन्ति वै कलौ ।
तेषां विपर्य्ययोत्पन्ना भवन्ति द्वापरे पुनः ॥
अवृष्टिर्मरणञ्चैव तथैव व्याध्युपद्रवाः ।
वाङ्मनःकर्म्मभिर्दुःखैर्निर्व्वेदो जायते ततः ।
निर्व्वेदाज्जायते तेषां दुःखं मोक्षविचारणा ।
विचारणायां वैराग्यं वैराग्याद्दोषदर्शनम् ॥
दोषाणां दर्शनाच्चैव ज्ञानोत्पत्तिश्च जायते ।
तेषां मेधाविनां पूर्ब्बमाद्ये स्वायम्भुवेऽन्तरे ।
उत्पद्यन्तीह शास्त्राणां द्वापरे परिपन्थिनः ॥
आयुर्व्वेदविकल्पाश्च अङ्गानां ज्योतिषस्य च ।
अर्थशास्त्रविकल्पाश्च हेतुशास्त्रविकल्पनम् ॥
प्रक्रियाकल्पसूत्राणां भाष्यविद्याविकल्पनम् ।
स्मृतिशास्त्रप्रभेदाश्च प्रस्थानानि पृथक् पृथक् ॥
द्वापरेष्वभिवर्त्तन्ते मतिभेदास्तथा नृणाम् ।
मनसा कर्म्मणा वाचा कृच्छ्राद्वार्त्ता प्रसिध्यति ॥
द्वापरः सर्व्वभूतानां कायक्लेशपुरस्कृतः ।
लोभो धृतिर्वणिग्युद्धन्तत्त्वानामविनिश्चयः ॥
वेदशास्त्रप्रणयनं धर्म्माणां सङ्करस्तथा ।
वर्णाश्रमपरिध्वंसः कामद्वेषौ तथैव च ॥
पूर्णे वर्षसहस्रे द्वे परमायुस्तदा नृणाम् ।
निःशेषे द्वापरे तस्मिन् तस्य सन्ध्या तु पादतः ॥
गुणहीनास्तु तिष्ठन्ति धर्म्मस्य द्वापरस्य तु ।
तथैव सन्ध्यापादेन अंशस्तस्य प्रतिष्ठितः ॥"
इति मत्स्यपुराणे १२० अध्यायः ॥

द्वापरयुगं, क्ली, (द्वापर एव युगम् ।) तृतीययुगम् । तस्योत्पत्त्यादि यथा । "भाद्रकृष्णत्रयोदश्यां गुरुवासरे द्वापरयुगोत्पत्तिः । तत्र अवतारद्वयम् । कृष्णबुद्धौ । पुण्यमर्द्धम् । पापमर्द्धम् । नैमिषारण्यं तीर्थम् । नाड़ीस्थो ब्राह्मणः । रक्तगताः प्राणाः । सप्तहस्तपरिमितो मानवदेहः । सहस्राब्दमायुः । ताम्रपात्रे भोजनम् । इति द्वापरयुगस्य लक्षणम् । द्वापरयुगाब्दाः ८६४,००० । द्वापरयुगस्य राजानः शाल्वविराटहंसध्वजकंसध्वजनैयूरध्वजवभ्रुवाहनरुक्माङ्गदजरासन्धदुर्य्योधनयुधिष्ठिराः ।
धर्म्माधर्म्मरतो लोकः प्रलापी चपलः सदा ।
ज्ञाननिष्ठः कपटवाक् द्वापरे राजविस्तरः ॥
तत्र तारकब्रह्मनाम ।
हरे ! मुरारे मधुकैटभारे
गोपाल गोविन्द मुकुन्द शौरे ।
यज्ञेश नारायण कृष्ण विष्णो !
निराश्रयं मां जगदीश ! रक्ष ॥"
इति मुद्राङ्कितपञ्जिकातः संगृहीतम् ॥

द्वापरयुगाद्या, स्त्री, (द्वापरयुगस्य आद्या आरम्भिका तिथिः ।) द्वापरयुगारम्भतिथिः । सा च गौणभाद्रकृष्णत्रयोदशी । तत्प्रमाणं युगाद्याशब्दे द्रष्टव्यम् ॥

द्वारं, क्ली, (द्वरति निर्गच्छति गृहाभ्यन्तरादनेनेति । दृ + घञ् ।) निर्गमनम् । अभ्युपायः । इति मेदिनी । रे, ४८ ॥ आद्यस्य पर्य्यायः । द्वाः २ प्रतीहारः ३ । इत्यमरः । २ । २ । १६ ॥ वारकम् ४ । इति शब्दरत्नावली ॥
"गृहिणां शुभदं द्वारं प्राकारस्य गृहस्य च ।
न मध्यदेशे कर्त्तव्यं किञ्चिन्न्यूनाधिकं शुभम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

द्वारकः, पुं, (द्वारेण प्रशस्तप्रतीहारेण कायति शोभते इति । कै + कः) द्वारका । इति शब्दरत्नावली ॥

द्वारकण्टकः, पुं, (द्वारस्य कण्टक इव ।) कवाटम् । इति शब्दरत्नावली ॥

द्वारका, स्त्री, (द्वारेण बहुना प्रशस्तेन च प्रतीहारेण कायतीति । कै + कः । स्त्रियां टाप् ।) स्वनामख्यातपुरी । तत्पर्य्यायः । द्वारावती २ द्वारवती ३ वनमालिनी ४ द्वारिका ५ अब्धिनगरी ६ द्वारकः ७ । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । १३२ । ४६ ।
"सात्यकं प्रेषयामास द्वारकां द्वारमालिनीम् ॥") तस्या निर्म्माणप्रकारो यथा,—
श्रीकृष्ण उवाच ।
"हे समुद्र महाभाग ! स्थलञ्च शतयोजनम् ।
देहि मे नगरार्थञ्च पश्चाद्दास्यामि निश्चितम् ॥
नगरं कुरु हे कारो त्रिषु लोकेषु दुर्लभम् ।
रमणीयञ्च सर्व्वेषां कमनीयञ्च योषिताम् ॥
वाञ्छितञ्चापि भक्तानां वैकुण्ठसदृशं परम् ।
सर्व्वेषामपि स्वर्गाणां परं परमभीप्सितम् ॥
दिवानिशं खगश्रेष्ठ ! सन्निधौ विश्वकर्म्मणः ।
स्थितिं कुरु महाभाग ! यावन्निर्म्माति द्वारकाम् ॥
विश्वकारुरुवाच ।
द्वारकाञ्च किमाकारां करोमि जगतां विभो ! ।
कथयस्व महाभाग ! निर्म्माणक्रममीश्वर ! ॥
भगवानुवाच ।
शतयोजनपर्य्यन्तं नगरं सुमनोहरम् ।
पद्मरागैर्मरकतैरिन्द्रनीलैरनुत्तमैः ॥
रुचकैः पारिभद्रैश्च पालङ्कैश्च स्यमन्तकैः ।
गन्धकैर्गालिमैश्चैव चन्द्रकान्तादिभिस्तथा ॥
सूर्य्यकान्तादिभिश्चैव पुत्त्रैश्च स्फटिकाकृतैः ।
हरिद्वर्णैश्च मणिभिः श्यामैर्गौरमुखैश्च वै ॥
गोरोचनाभैः पीतैश्च दाड़िम्बवीजरूपकैः ।
पद्मवीजनिभैश्चैव नीलैः कमलवर्णकैः ॥
मणिभिः कज्जलाकारैरुज्ज्वलैश्च परिष्कृतैः ।
श्वेतचम्पकवर्णाभैस्तप्तकाञ्चनसन्निभैः ॥
स्वर्णमूल्यशतगुणैरीषद्रक्तैश्च रूपकैः ।
गरिष्ठैश्च वरिष्ठैश्च मणिश्रेष्ठैश्च पूजितैः ॥
यथाविधानं यद्योग्यं यत्र यद्युक्तमीप्सितम् ।
मणीनां हरणञ्चैव यक्षसंघा हिमालयात् ॥
दिवानिशं करिष्यन्ति यावन्निर्म्माणपूर्ब्बकम् ।
यक्षैश्च सप्तभिर्लक्षैः कुवेरप्रेरितैरपि ॥
वेतालक्षैः कुष्माण्डलक्षैः शङ्करयोजितैः ।
दानवैर्ब्रह्मरक्षोभिः शैलकन्यानियोजितैः ॥
कुरु दिव्यञ्च पत्नीनां सहस्राणाञ्च षोड़श ।
अन्यपत्नीजनस्यापि चाष्टाधिकशतस्य च ॥
शिविरं परिखायुक्तमुच्चैःप्राकारवेष्टितम् ।
युक्तं द्वादशसारैश्च सिंहद्वारपुरस्कृतम् ॥
युक्तं चित्रैर्विचित्रैश्च कृत्रिमैश्च कवाटकैः ।
निषिद्धरक्षरहितं प्रसिद्धैश्च पुरस्कृतम् ॥
सुलक्षणं चन्द्रवेधं प्राङ्गनञ्च तथैव च ।
यदूनामाश्रमं दिव्यं किङ्कराणान्तथैव च ॥
सर्व्वप्रसिद्धं निलयमुग्रसेनस्य भूभृतः ।
आश्रमं सर्व्वतोभद्रं वसुदेवस्य मत्पितुः ॥
कथितः लोकशिक्षार्थं कुरु कार्ष्णं विना पुरीम् ।
शुभक्षणञ्चाप्यधुना गच्छ वत्स ! यथासुखम् ॥
विश्वकर्म्मा हरिं नत्वा जगाम पक्षिणा सह ।
समुद्रस्य समीपञ्च वटमूलं मनोहरम् ॥
सुष्वाप तत्र नक्तञ्च कारुश्च पक्षिणा सह ।
स्वप्ने द्वारवतीं रम्यां ददर्श गरुड़स्तथा ॥
यत्किञ्चित् कथितः कारुः कृष्णेन परमात्मना ।
तदेव लक्षणं सर्व्वं ददर्श नगरे मुने ! ॥
कारुं हसन्ति स्वप्ने च सर्व्वे ते शिल्पकारिणः ।
गरुड़ं गरुड़ाश्चान्ये वलवन्तश्च पक्षिणः ॥
बुद्धा ददर्श गरुड़ो विश्वकर्म्मा च लज्जितः ।